स्यादिति ब्रह्मचारी वैणवयष्टिमान् कमण्डलुमान् स्यादिति सर्वत्र सम्बन्धनीयम्। अत्र ब्रह्मचारिप्रकरणोक्तस्यापि यज्ञोपवीतस्य पुनर्वचनं द्वितीयप्राप्त्यर्थम्। यथाह वशिष्ठः "स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः" इति। अत्र च दाण्डायणीति सामान्याभिधानेऽपि कुण्डलधारणमेव कार्य्यम् "वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम्। यज्ञोपवीतं वेदञ्च शुभे रौक्मे च कुण्डले" इति मनुस्मरणात्। देवं देवप्रतिमां मृदमुद्धृताम्। गां ब्राह्मणं वनस्पतिं चाश्वत्थादिकं प्रदक्षिणं कुर्य्यात् एतान् दक्षिणतः कृत्वा व्रजेत्। एवञ्चतुष्पथादीनपि "मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन्" इति मनुस्मरणात् मिता०। "न तु मेहेन्नदीच्छायावर्त्मगोष्ठाम्बुभस्मसु। न प्रत्यग्न्यर्कगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः" याज्ञ०। "नद्यादिषु न मेहेत् न मूत्रपुरीषोत्सर्गं कुर्य्यात्। एवं श्मशानादावपि यथाह शङ्खः "न गोमयकृष्टोप्तशाद्वलचितिश्मशानवल्मीकखलपर्व्वतपुलिनेषु मेहेत् भूताधारत्वादिति"। तथाग्न्यादीन् प्रति तदग्न्यादीनामभिमुखं न मेहेत्। नाप्येतान् पश्यन् यथाह गौतमः "न वाय्वग्निविप्रादित्यापोदेवतागाश्च प्रति पश्यन् वा मूत्रपुरीषामेध्यानि कुर्य्यान्न देवताः प्रति पादौ प्रसारयेत्"। एतद्देशव्यतिरेकेण भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्य्यादिति यथाह वशिष्ठः "परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्य्यादिति" मिता०। "नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्। न च मूत्रं पुरीषञ्च नाशुचीराहुतारकाः" याज्ञ०। "नैवार्कमीक्षेतेति यद्यपि सामान्येनोक्तं तथापि उद्यास्तमयराहुग्रस्तोदकप्रतिबिम्बमध्याह्नवर्त्तिन एवादित्यस्येक्षणं निषिध्यते न सर्वदा। यथोक्तं मनुना "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्" इति। उपभोगादन्यत्र नग्नां स्त्रियं नेक्षेत "न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनात्" इत्याश्वलायनः। संसृष्टमैथुनां कृतोपभोगाम्। उपभोगान्ते आत्मनामपि नेक्षेत। चकाराद्भोजनादिकमाचरन्तीम्। तथा च मनुः "नाश्नीयाद् भार्य्यया सार्द्धं नैनामीक्षेत चाश्नतीम्। क्षुवतीं जृम्भमाणाञ्च न चासीनां यथासुखम्। नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम्। न पश्येत् प्रसवन्तीं च श्रेयस्कामो द्विजोत्तमः" इति। मूत्रपुरीषे च न पश्येत्। तथा अशुचिः सन् राहुतारकाश्च न पश्येत्। चकारादुदके स्वप्रतिबिम्बम्। "न चोदके निरीक्षेत स्वरूपमिति धारणा" इति वचनात्" मिता०। "अयं मे वज्र इत्येवं सर्व्वं मन्त्रमुदीरयन्। वर्षत्यप्रावृतो गच्छेत् स्वपेत् प्रत्यक्शिरा न च" याज्ञ०। वर्षति सति अयं मे वज्रः पाप्मानमपहन्त्विति मन्त्रमुच्चारयन् अप्रावृतोऽनाच्छादितो न गच्छेन्न धावेत् "न प्रधावेच्च वर्षतीति" प्रतिषेधात्। न च प्रत्यक्शिराः स्वप्यात्। चकारान्नग्नो न शयीत। एकश्च शून्यगेहे। "न च नग्नः शयीतेति" "नैकः स्वप्यात् शून्यगेहे" इति मनुस्मरणात्" मिता०। "ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्। पादौ प्रतापयेन्नाग्नौ न चैनमभिलङ्घयेत्" याज्ञ०। ष्ठीवनमुद्गिरणम्। असृग्रक्तम्। शकृत् पुरीषं शेषं प्रसिद्धम्। एतान्यप्सु न निक्षिपेत्। नापः पादेन ताडयेत्। एवन्तुषादीनपि। यथाह शङ्खः "तुषकेशकरीषकपालास्थिश्लेष्मनखलोमान्यप्सु न निक्षिपेत्। न पादेन पाणिना वा जलमभिहन्यादिति"। अग्नौ च पादौ न प्रतापयेत्। नाप्यग्निं लङ्घयेत्। चकारात् ष्ठीवनादग्नौ न क्षिपेत्। मुखोपधमनादि चाग्नेर्न कुर्य्यात् तथा च मनुः "नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्। न चैनं पादतः कुर्य्यान्न प्राणाबाधमाचरेत्" इति मिता०। "जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्म्मघ्नैर्व्याधितैर्वा न संविशेत्" याज्ञ०। "जलमञ्जलिना संहताभ्यां पाणिभ्यां न पिबेत्। जलग्रहणं पेयमात्रोपलक्षणम्। विद्यादिभिरात्मनोऽधिकं शयानं न प्रबोधयेत् नोत्थापयेत् "श्रेयांसञ्च प्रबोधयेदिति" निषेधात्। अक्षादिभिर्न क्रीडेत्। धर्म्मघ्नैः पशुलङ्घनादिभिः कर्म्मभिर्न क्रीडेत्। व्याधितैर्ज्वराद्यभिभूतैरेकत्र न संविशेत् न शयीत" मिता०। "विरुद्धं वर्जयेत् कर्म्म प्रेतधूमं नदीतरम्। केशभस्मतुषाङ्गारकपालेषु च संस्थितिम्" याज्ञ०। "जनपदकुलाचारशास्त्रविरुद्धञ्च कर्म्म वर्जयेत्। प्रेतधूमं बाहुभ्यां नदीतरणञ्च वर्जयेदिति सम्बध्यते। केशादिषु संस्थितिं वर्जयेत्। चकारादस्थिकार्पासामेध्येषु च" मिता०। "नाचक्षीत धयन्तीं गां नाद्वारेण विशेत् क्वचित्। न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्त्तिनः" याज्ञ०। "परस्य क्षीरादि पिबन्तीं गां परस्मै नाचक्षीत न च निवर्त्तयेत्।